२ । ६४ । इति डौः ।) चन्द्रः । (यथा, अथर्व्ववेदसंहितायाम् । ६ । ८३ । ३ ।
"ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ॥")
कर्परः । इत्यमरः । १ । ३ । १४ ॥

---

## घ

घ, घकारः । स तु व्यञ्जनचतुर्थवर्णः । अस्योच्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ (एतत्तु मुग्धबोधमतम् । यथा, "अ आ ह क ख ग घ ङाः कण्ठ्याः ।" पाणिनीये तु एष कण्ठ्यो जिह्वामूलीयश्च । यथा, "अकुहविसर्ज्जनीयानां कण्ठः ॥" इत्युक्त्वा पुनः शिक्षायाम् ।
"जिह्वामूले तु कुः प्रोक्तो दन्त्यौष्ठ्यो वः स्मृतो बुधैः ॥")
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"घकारं चञ्चलापाङ्गि ! चतुष्कोणात्मकं सदा ।
पञ्चदेवमयं वर्णमरुणादित्यसन्निभम् ॥
निर्गुणं त्रिगुणोपेतं सदा त्रिगुणसंयुतम् ।
सर्व्वगं सर्व्वदं शान्तं घकारं प्रणमाम्यहम् ॥"
अस्योत्पत्तिर्गवर्णे द्रष्टव्या ॥ वङ्गाक्षरैस्तस्य लेखनप्रकारादिर्यथा,—
"ऊर्द्ध्वरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षतः ॥
अत ऊर्द्ध्वं गता रेखा शम्भुर्नारायणस्तयोः ।
ब्रह्मस्वरूपिणी देवि ! मात्राशक्तिः प्रकीर्त्तिता ॥"
अस्य ध्यानं यथा,—
"मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम् ।
शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम् ॥
सदा स्मेरमुखीं रम्यां लोचनत्रयराजिताम् ।
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रणाममन्त्रो यथा, वर्णोद्धारतन्त्रे ।
"निर्गुणं त्रिगुणोपेतं सदा त्रिगोलसंयुतम् ।
सर्व्वगं सर्व्वदा शान्तं घकारं प्रणमाम्यहम् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"घः खड्गी घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
वायुः शिवोत्तमः सत्ता किङ्किणी घोरनायकः ॥
मरीचिर्व्वरुणो मेधा कालरूपी च दाम्भिकः ।
लम्बोदरा ज्वालमूलं नन्देशो हननं ध्वनिः ॥
त्रैलोक्यविद्या संहर्त्ता कामाख्यमनघामयः ॥"
घः, पुं, ( घण्टयति शब्देन शोभते घटयति घर्घरादिशब्दं वा । घटि द्युतौ घट चेष्टायां च + बाहुलकात् डः ।) घण्टा । घर्घरशब्दः । इति मेदिनी । घे । १ ॥
घग्घ, हसने । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् ।) कण्ठ्यवर्गतृतीयोपधः । घग्घति । इति दुर्गादासः ॥
घट, क हिंसे । संघाते । द्युतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-अकंच-सेट् ।) क, घाटयति कवाटं द्वारि जनः संयोजयतीत्यर्थः । इति दुर्गादासः ॥
घट, इ कि द्युतौ । इति कविकल्पद्रुमः ॥ ( चुरां-पक्षे भ्वां-परं-अकं-सेट् ।) इ, भावे घण्ट्यते । कि, घण्टयति घण्टति । द्युतिर्दीप्तिः । द्युत्यर्थत्वेन पाचिकचुरादित्वे सिद्धे कि करणमर्थान्तरेऽपि पाचिकचुरादित्वार्थम् । तथाच,—
"क्रियावाचित्वमाख्यातुं प्रसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"
इति वोपदेवः ॥
प्रसिद्धार्थं कथयितुं धातूनां प्रसिद्धोऽर्थः प्रदर्शितः । किन्तु महाकविप्रयोगं दृष्ट्वान्येऽप्यर्था मन्तव्याः हि यस्मात् धातवोऽनेकार्था भवन्तीत्यर्थः । तेन हिंसास्तुत्योः पठितस्यापि शंसतेः कथनार्थत्वे न मे ह्रिया शंसति किञ्चिदीप्सितमिति रघौ कथयतीत्येवार्थः । एवं दीप्तिपठितस्यापि तर्कधातोर्वितर्कणार्थत्वे तर्कयत्यन्यगुणं सुधीरित्यादिः । इति दुर्गादासः ॥
घट, ष ङ म चेष्टे । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-अकं-सेट् । ) ष, घटा । ङ, घटते पठितुं शिष्यः । म, घटयति । घटतीति घटो ज्ञेयो नाघटन् घटतामियादिति तु घटते घटः पचादित्वादन् । ततो घट इवाचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥ ( यथा, भट्टिः । १२ । २६ ।
"घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं मुञ्चति चञ्चलापि ॥" )
घटः, पुं, ( घटते मृदादिसङ्घातैः जलादिग्रहणाय इत्यर्थः । घट् + पचाद्यच् ।) कलसः । इत्यमरः । २ । ६ । ३२ ॥ (यथा, मनुः । ८ । ३१९ ।
"यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥")
तस्य परिमाणं कलसशब्दे द्रष्टव्यम् ॥ समाधिभेदः । ( घटस्थवारिवत् निश्चलत्वात्तथात्वम् । ) स तु कुम्भकम् । इभशिरः । (आकृतिसादृश्यात्तथात्वम् ।) कूटकुटः । इति मेदिनी । टे । ७ ॥ कुम्भराशिः । यथा,— [लभेत् ।"
"सिंहे वा यदि गोघटे गतनरः सर्व्वार्थसिद्धिं
इति समयप्रदीपः ॥ द्रोणपरिमाणम् । इति वैद्यकपरिभाषा ॥ (अस्य पर्य्याया यथा,—
"चतुर्भिराढकैर्द्रोणः कलशोनल्वणोर्म्मलः ।
उन्मानश्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥
"कंसश्चतुर्गुणो द्रोणः अर्म्मणोनल्वणश्च तत् ।
स एव कलशः ख्यातो घट उन्मान मेव च ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)
कुम्भपरिमाणम् । यथा,—
"दशद्रोणो भवेत् खारी कुम्भस्तु द्रोणविंशतिः ।"
इति प्रायश्चित्ततत्त्वे कात्यायनः ॥
(योगावस्थाभेदः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव यथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
एतदवस्थायां किं स्यात्तदाह तत्रैव । ४ । ७२ ७३ ।
"द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढ़ासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्द्दश्च भेरीशब्दस्तथा भवेत ॥")
घटकः, पुं, ( घटयति परस्परसम्बन्धादिकमिति । घट् + णिच् + ण्वुल् । ) कुलाचार्य्यः । तस्याशास्यत्वम् । यथा,—
"वरं चाण्डालसंस्पर्शं कुर्य्यात्तु साधकोत्तमः ।
तथाप्यस्पृश्यगणकं सर्व्वदा तं परित्यजेत् ॥
दूषिताः कलिकालेषु भारते विविधाः प्रजाः ।
अतएव महेशानि ! सर्व्वे संसर्गदूषिताः ॥
घटकं ब्राह्मणं देवि ! संस्पर्शं यत्नतस्त्यजेत् ॥"
इति शाक्तानन्दतरङ्गिण्यां षोड़शोल्लासे माहेश्वरीतन्त्रवचनम् ॥ * ॥ योजकः । तत्पर्य्यायः । चारचरः २ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा, कुलदीपिकायाम् ।
"धावको भावकश्चैव योजकश्चाग्रकस्तथा ।
दूषकस्तावकश्चैव षडेते घटकाः स्मृताः ॥"
अन्यच्च ।
"के नो विदन्ति पुरुषा पुरुषानुपूर्व्वीं
सर्व्वोत्तमे कुलभृतां परिवर्त्तनं वा ।
अत्यन्तसूक्ष्ममपि ये कुलतारतम्यं
जानन्ति ते हि घटका न तु योजकाद्याः ॥"
वनस्पतिः । पुष्पेण विना यः फलति सः । इति भूरिप्रयोगः ॥ (घटयति योजयति परार्थाहितादिकं साधयतीत्यर्थः । योजके, त्रि । यथाह भर्तृहरिः । २ । ६६ ।
"ते के सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
ते वै मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये च घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥")
घटदासी, स्त्री, ( घटार्थं घटनार्थं नियोजिता दासीव या । घटयति योजयति नायकनायिके इति घटा योजिका सा दासीव इति वा । ) कुट्टनी । तत्पर्य्यायः । कुट्टिनी २ रण्डा ३ दततालो ४ गणेरुका ५ । इति त्रिकाण्डशेषः ॥
घटना, स्त्री, (घट + णिच् + युच् टाप् च ।) संघातीकरणम् । सम्बद्धीकरणम् । यथा, "करिणां घटना घटा ।" इत्यमरः । २ । ८ । १०७ ॥ योजना । मेलनम् । यथा, "अघटनघटनापटीयसी माया ।" इति मायालक्षणम् ॥ ( यथा, राजतरङ्गिण्याम् । ४ । ३६५ ।
"शक्तिः काऽप्यपरीक्षितास्ति महतां स्वैरं दविष्ठान्यहो
यन्माहात्म्यवशेन यान्ति घटनां कार्य्याणि निर्यन्त्रणम् ॥")
घटयोनिः, पुं, ( घटः कुम्भः योनिः कारणं उत्पत्तिस्थानम् यस्य । ) अगस्त्यमुनिः । इति हलायुधः ॥